रहैदशकारजूपांशीसेतिप्रामित्रवद्धा अवहारेष्कावकाशावस्य मातुरुत्तराधस्यामे राम
वप्रयोगात्तस्याश्चत्तं वत्सरपत्नीत्वेनोपक्रमे मे सु तत्वा मातुरुत्तराधनीस्त्वमाद ५५

गरेवतायाश्च यो जनाः स्मृतिनंदति गोत्रे चेनुमिवा पत्तिं संवत्सरस्य मा पत्नी सा नोक्तानो
अस्तु स्पृगता तिततंत्रे संवत्सरपत्नीत्वेन संकीर्तिनात्मा मातुरुत्तराधस्याश्चवरकाष्ठका
त्वप्रतीते तस्यां च उपसंपत्यनुरोधेनोपक्रमोपसंहारयोः स्रुतत्वेन च मातृव्यापरवयोषि
मासीपरेनाभिधानात्ततः पुरस्तादेकादशपांदीक्षामिद्धं अत एव सर्वोपपद्यते वादश एवं
व्याख्येयः यद्यपि हेमंते नगमावादे काष्ठकेव दीक्षायां प्रशस्तात प्यात्वात्वर्त्तत्वमस्तत्वा
न भिनंदकत्वरूपरेष्वत्वयात्मा मतिक्रम्यापि चैत्र एव परं प्रशस्ता माघ्येकादशीतुत
दपेक्षयापि प्रशस्ततरा॥ एकाष्टकायाः द्वादशीदीक्षोत दशरात्रयोरश दिन रूपायाः
कैपसंपत्यानुग्रहीत्वादिति॥ ॥ दीक्षाकालस्य॥ ॥ सोमे दीक्षितो न जुहोति तावदिना
पुरुषाणां माग्निहोत्रादीनां त्वं गत्वेन पर्युदासः प्रतिषेधो वा दीक्षितस्य श्रुतं
अव सर्वे चक्रते दीक्षामुक्ति॥ तपरश्चंद्रनादिना कारणेन संध्यातः पंचविक्रियमाणा

वमस्यास्योत्कर्षस्तदाकालेग्निहोत्रंकर्त्तव्यमेवं।पार्वंतेकालेन्याय्यत्वेनरीस्यात्तवृत्ति
स्तावत्कालंनजुहोतीतिप्रतिषेधशास्त्राभावधारणादितिप्रापिकाललक्षणायां
प्रयाणाभावाद्देशवृत्तिदेशावधिः॥तस्याश्चानिर्वर्त्तत्वात्कर्त्तव्यमेवाग्निहोत्रादि॥
॥तत्रप्रतिहोमः॥॥देशाप्यास्तांहोमांगत्वेनाग्निहोत्रप्रतिषेधेपिअग्निहोत्रपा
वरोहस्थितस्मिन्नस्मत्कर्तृत्वाभ्युतेकालेतदकरणाभिन्नप्रत्यवायस्यावरूपकत्वात्त
स्परिहारार्थंगौणकालेप्रायश्चित्तपूर्वकंकार्यंएवाग्निहोत्रहोमः॥देवापराधक
तहोमोत्कर्षेतुसुतरापितिप्राप्तेयावज्जीवादिवाक्यैःकालावच्छिन्नस्यजीवनादे
र्निमित्तत्वमित्यविवादं।तेषांचनसायंकालत्वमुच्चित्वाहीनातत्वेनतत्वेनावच्छेदक
त्वगौरवत्।अपितुशाब्दतोर्थतोवायोनिषिद्धःकालस्तद्भिन्नकालत्वेनसायमादिका
लविधेर्हिनियमविधित्वात्तदितरकालनिवृत्तिरार्थिकी॥एवंमुच्चित्वाहिताग्नेर्मु

त्यकालनिवृत्त्यापिनिषेधोपिचात्रनविधेयक्रियांगमतस्वविवक्षितोपित्वम्यां
गमतोपि।अविशेषात्।तस्मिन्नस्तिविधेयक्रियायाअकरणस्यतत्वाप्यावरूपकत्व
ं।अतश्चपर्यवपश्चार्थेनापिगौणेहनेनावरुद्धस्यप्रणयमनस्यमन्त्रमतःप्रयोजक
त्वंतस्मिन्नस्तितस्यकार्त्तमशक्यत्वात्।ओतस्वनन्तरभावकर्तेवगुणपमपि।एवंसोमां
गमतेनापिनिषेधेनावरुद्धस्यदेशकालावच्छिन्नजीवनस्यनैमित्तिकानुष्ठापक
त्वानुपपत्तेर्नतदकरणप्रत्यवायादिः।अतोपश्चकामस्यैवचमसेधिकारवदत्तीक्षि
तस्यैवाग्निहोत्राद्यनधिकारोनिषेधपक्षेपिफलितोभवति।यदालुह्यक्षितोनजु
होतीत्यस्याग्निहोत्राद्यवधिकारोनिषेधविध्येकवाक्यतामापद्यपर्युदासत्वंम
न्यक्रियतेतदास्यैवदीक्षितस्यतत्रानधिकारः॥अतश्चमुख्यकालेअनधिका
रिणोयाकालेकरणमनाशंक्य॥एवंदेवादिनाअवमस्योत्कर्षेपिदोषाद्वत्वस्यकप्प

भा.ष. ५७

स्य विशेषानुरोधान्मुख्यकालेनधिकारस्यतुल्यत्वेननगौणकालेप्रतिहोमकरणं॥॥ प्रति
षेधश्च॥॥ कृतेवमस्यैयद्युदवसानीयोल्लंघोदेवादिनाभवेत्तत्कालेप्राप्तेपि हो
त्रहोमस्यवकर्तव्यस्तस्यकालोवाप्रतिहोमःकार्यः॥ दीक्षायामवमस्येनोन्माचितत्वा
त्॥ यत्तुपूर्तयापुनराधेयमंनित्यंप्रायश्चित्तंहोत्रेजुहोतीतिवचनंतस्यकारणांतरस्यायातोक्ता
गतत्वादुदवसानीयेष्टंगतयेववाकर्मांतरविधायकमितिप्राप्तेनिषेधप्रतियोगित्वेना
ग्निहोत्रादेरुपस्थितत्वात्तत्प्रतिपेक्षितावधिसमर्पकत्वेनाप्युपपत्तौकर्मांतरविधापि
त्वानयपत्तेर्दीक्षोन्माकेपिउदवसानीयेष्टिप्रतीक्षाउपाआवरपकत्वात्पूर्ववदेवानधि
कारान्नप्रतिहोमादिकरणं॥ यत्तुदीक्षासंजातायस्मोतिदीक्षितइत्यनिषेधप्रसक्तौउ
क्तिसुरूपत्वाभ्दतदीक्षोपनिकल्पमेवंनिषेधप्राप्तोउक्तेरूपमास्त्रोयातेतदीक्षाभावेपि
सर्वदानिषेधप्रसक्तौउदवसानीयायाअवधेर्च्छमख्याहतमेवनतदुल्लंघेप्रतिहो

राम ५७

मादि॥॥ प्रतिहोमश्चैवंचेत्॥॥ यदवमस्योल्लंघेप्रतिहोमस्तस्यकृत्वाचिंतयाविचार्यते॥ अग्नि
होमसंस्थाकृञोनिषेधेजवमस्यपस्यसमयकालात्पूर्वमेवकर्तव्यत्वेनतदुत्तरंरात्रौकारणा
स्यकस्यैवसायंहोमस्यअप्राविहोकोत्तरगौणकालकरणा॥ आद्यातराहृतेःसायंहोमस्य
गौणकालोवाचनिकःप्रातर्होमस्यसायंकालावधिवतांगौणकालस्य॥ प्रतिक्रमेसस्यका
लक्रियमाणप्रातर्होमेनसहसमस्यहोमविधायतंत्रेणकरणं॥ अवमस्योल्लंघेपानेकहो
यकालातिपत्तौतुसर्वान्सायंहोमान्प्रतिहोमांश्चयस्तहोमविधिनासमस्यहोमविधिना
चस्वकालेक्रियमाणहोमेनसहतंत्रेणकुर्यात्॥ अत्यातिपतितेक्रमेणहोमयानांक्रमेणोद
करणांशाकंयस्यनरेखाकालकर्तव्यकनसमस्यहोमपक्षहोमविधिर्वैषम्यप्रसंगेन
चअनेकस्थीमासापूर्णमासातिपत्तिनिमित्तकपथिकृदिष्टिवदुपपक्षकारणानुपपत्तेः॥ अत
एवसर्वान्सायंहोमान्सायंकालेप्रातर्होमांश्चप्रातःकालएवकुर्यादितिसप्रपायासः॥ स्वकाल

भा॰च॰
५८

क्रियमाणहोमात्पूर्वमेवातिपन्नहोमानां कर्तव्यत्वात्। एवं षोडशिस्तोत्रेऽवर्तिते तस्य सम
याध्युषितकालीनत्वेनावभृथस्याग्रे वक्रियमाणत्वात्तस्य द्वितीयदिने उत्कर्षो प्रात
र्होमस्यैव पूर्वोक्तविधमानुष्ठानं॥ अनेकहोमकालातिपत्तावपि तथैव न च दर्शपौर्णमा
सयोः पौर्णमासौपक्रमकयोरेव मिलितयोः फलसाधनत्ववत्सायमुपक्रमयोरेव साय
प्रातर्होमाभ्यासयोरेकफलसाधनत्वस्य कल्पसूत्रेष्व सिद्धीनाद्यो द्विनि सायंहोम
अनधिकारैकं प्रातर्होमेष्वधिकार इति वाच्यं प्रातस्तु वा इमिनीति जैमिनिसूत्रकृद्व
चनादेव सायमुपक्रमपक्षत्वस्यैकपक्षाभावप्रतीतेः॥ अतएव वक्त्वाचिंतो घटनेऽपि परि
उदवसानीयाया रात्रौ करणे तत्प्रातर्होमानुष्ठानं जैमिनिमतेनानुपपन्नं॥ प्राय
श्चित्तं॥ जिह्मो जुहोतीत्यादिप्रायश्चित्तं तन्नैमित्तिकमपि फलापेक्षायाः प्रकरणात्कर्त्व
गनिमित्तमपि मेरनादिनैतैकैककपालादेः प्रायश्चित्तमस्याबलेन क्रत्वंगभूतके

राम
५८

पालादिभेदेन निमित्तवैगुण्यपरिहारार्थत्वस्यैव कल्पनेन स्वतंत्रापूर्वकल्पने गौरवात्॥ व्यापन्ना
स्य॥ व्यापन्नमप्सु प्रहरतीति वाक्ये श्रुतस्य व्यापन्नशेषस्य पुरोडाशादीनाममोज्यकीटाद्यवपन्नादेरितर
प्रत्तैवैवतेषां प्रयोगादिहितिश्चिद्यहितोपयुक्तं॥ विभागश्रुतेः॥ ज्योतिष्टोमे दक्षिणायाः नेकत्वा
त्कवाहिष्पवमानार्थं तद्देशं कर्षंघन्त्वा प्रसर्पतीं उद्गातृप्रतिहर्तृप्रस्तोतॄणां मध्ये यद्युद्गाता
पच्छिद्याददक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यात्॥ यदि प्रतिहर्ता
सर्ववेदसं दद्यात् यदि प्रस्तोता ब्रह्मणे वरं दद्यादित्यादिनानाकर्तृकापच्छेदनिमित्ते प्रायश्चि
त्ते श्रुता॥ तत्रापच्छेदनामविभागरूपं फलमेव न तत्तत्कर्तृकुलाक्रिया॥ अतस्तत्कर्तृत्वेन हा
प्रयत्नं॥ ततश्च तत्स्यव्यासज्यवृत्तित्वाद्यद्यपि नो द्गात्रादिना एकेन व्यवहारो युज्यते तथापि
दिवाततत्कर्तृकायाकर्तृत्वादेवात्र तत्कर्तृत्वव्यवहारः तस्याश्चान्यतरक्रियाजन्यत्वमपि क्रि
याजन्यत्ववद्विलीनोष्ट्रव्यस्यापि पृथुत्वे यव कर्तृत्वमिति इत्रातमात्रतिष्क्रिया
जन्यविभागइव उभयनिष्ठक्रियाजन्यविभागोऽपि द्रष्टव्यः परेशोयमपरत्ते नैवतेव

भा.द.
५९

त्रापि गायत्र्यश्चित्तं उत्तरापि व न्यायाप्युते तत्र विप्रतिषेधात्॥ योगपद्ये प्रायश्चित्तद्वय
मविरोधात्तु शुद्धयेनैव। प्रतिहर्त्रपच्छेदनिमित्तेऽह सर्वस्वदानं उद्गात्रपच्छेदनिमित्ते पु
नः प्रयोगोऽपि शक्यत एव कर्तुं॥ अव्यवाहिते ग्रालेकेषु विशिष्य पुनः प्रयोगमात्रं तन्नै
मित्तिकं न पुनरदक्षिणमपि तस्यापूर्वपाठत्वेनानुवादत्वात्॥ अतः पूर्वप्रयोगे
पि सर्वस्वदानेन कश्चिद्विरोधः उद्गात्रपच्छेदे न तावत्सर्वप्रयोगस्य सर्वेऽच दाने अन्तस्य
प्यदक्षिणास्य नैमित्तिकत्वेऽस्मिँल्लोकर्वं स्यैव पूर्वप्रयोगे सर्वदानेनु यपते॥ नापि
पुनःप्रयोगे सर्वस्वदानं॥ प्रतिहर्त्रपच्छेदवन्निप्रयोग एव तद्विधानात्॥ अन्यथा स
कृत्प्रयोगे प्रतिहर्त्रपच्छेदे तोऽस्तद्वत्वाविशेषात्तदुत्तरसर्वप्रयोगेषु सर्वस्वापत्ते
पत्तिः॥ निमित्तवति प्रयोगे नैमित्तिकस्य दर्वादिकारो प्रयोगांतरेऽपि हरापत्तिः॥ अतो
विरोधादक्षिणपसर्वस्वदक्षिणपयोर्विकल्प एव। पुनःप्रयोगमात्रं परमविरोधा राम
भ्यवसेवत्तेनापि विकल्पं केचिदिच्छंति॥॥ यौगपद्ये॥॥ यदाऽक्रमेणानिमित्तद्वयसंनि ५९

पातस्तत्रासंजातविरोधित्वात्पूर्वनिमित्तकमेवनैमित्तिकं॥ अथवानात्रशास्त्रद्वयस्यतामा
न्यविशेषादिरूपतयाबलाबलं नापि क्रमाराततस्याभासरूपतयावुभयोरपि समतयैव प्रमारा
त्वात् अतुष्ठानवेलायां पौर्वापर्यं तु शास्त्रार्थावधारणापाले॥ अतो विकल्प एवेति प्रा
प्ते पूर्ववन्निसंदेहः शास्त्रांतेने नैमित्तिकेन स्वविषये न बाध्यते परत्वात्। तदुत्तेनच द्वारशास्त्र
तविधेर्निमित्तरहितप्रयोगविषयत्वकल्पनां तथैव परेणापि नैमित्तिकेन पूर्वस्य नै
मित्तिकस्यापि परत्वाद्विशेषादेव बाध[illegible] नैमित्तिकविधेश्च परनिमित्तरहितप्रयोग
विषयत्वकल्पन॥ तदुक्तं वचानुष्ठानकालीनमेव यौगपद्यं शास्त्रार्थावधारणावेला
यां पूर्वमेवालोच्य व्यवस्थितविषयत्वकल्पनेति न कश्चिद्विरोधः॥ न चासंजातवि
रोधित्वेनेह परविज्ञानस्यानुत्पत्तिः॥ ज्ञाते क्रमाराम्यकत्वेन तदयोगात् न हत्रे
तरं प्रयोगांपूर्वप्रयोगो कवाकतयास्वार्थबोधजनकं येन तदुपजीवित्वेन तदानुगुण्येन त

भा.प्र.
६०

र्नैत अत उत्तरमेवानपेक्षतयोत्पद्यमानं पूर्वप्रमाणस्य पुरनिमित्तवत्प्रयोगविषयत्वांशे
मिथ्यात्वं कल्पयति न च पूर्वमेव विज्ञानं परप्रमाणस्य पूर्वानिमित्तवत्प्रयोगविषयत्वां
शे मिथ्यात्वं किमिति न कल्पयतन्नत्र निरपेक्षयाने मितिकरवानरवकाशत्वमस्ति
उभयोरपि स्वेके कुनिमित्तकप्रयोगे हावकाशत्वादिति वाच्यं पूर्वनिमित्तोपनिपातवला
पांपरप्रमाणजन्यज्ञानं स्वानियमेनोपस्थितस्वभावेन धर्मिज्ञानाभावादुत्पत्तेस्पपूर्वनि
मित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वस्य कल्पयितुमशक्यत्वात्॥ परनिमित्तोपनिपान
ने लायापूर्वविज्ञानस्याचिकीर्षितीवषयत्वेनपुरस्फूर्तिकत्वादुन्मिज्ञानमत्वेनतउ
ततमिथ्यात्वकल्पनेन किंचिद्बाधकं यद्दितुयवनिमित्तोपनियातोत्तरमेवपूर्वेणास्य
मिथ्यात्वकल्पनमित्याशंक्येतात यापिपद्दापरनिमित्तनिपातोत्तरं पूर्वप्रमाणाविस्मर रान
पांतरातेनोत्तरस्य मिथ्यात्वकल्पनानुपपत्ते रवश्यं भवन्मते पूर्वप्रमाणस्मरणं कल्प्यं ६०

मन्मतेनु यदि दैव दुरात्पूर्वप्रमाणास्मरणं तदा तस्यामिथ्यात्वकल्पनेपि विस्मरणेपि
रनैमित्तिकस्यैवानुष्ठानान्न किंचित्कल्प्यं तथा चायमक्रमः॥ परनिमित्तोपनिपाते
तन्नैमित्तिकवाक्यार्थज्ञानं ततः पूर्वविज्ञानस्य तेन सह विरोधज्ञानं ततस्त्वेनचपेक्षा
बुद्ध्यात्मकेन विनेश्वरस्थानचतुर्थक्षणे पूर्वज्ञानस्य भ्रांतित्वकल्पना॥ विरोधज्ञा
नदशायां तदुत्तरे वा परनैमित्तिकवाक्यार्थस्मरणाकल्पनात्मे ति न विरोधः॥ अतः हि
द्वं परेपापूर्वस्य बाधदृति॥॥ यद्युक्तं अनाता॥ क्रमेपिय छुज्ञातुरपच्छेदीज धर्मस्त
रातन्निमित्तः पुनः प्रयोगे स्वर्वस्वमेव देयं न तु द्वादशशतं॥ परनिमित्तयातात्पूर्वं
तस्यैव पूर्वप्रयोगे देयत्वेन प्रसक्तत्वात्॥ तत्र तदशारिन्यनेन यत्पूर्वप्रयोगे परनिमि
त्तपातात्पूर्वं देयत्वेन प्रसक्तं तस्य वरद्दिणात्वेन विधानात् द्वादशशतस्य पूर्वनिमित्तेन
वबाधितत्वेन देयत पाऽस्प्रसक्तेः॥ अनन्त्वपक्षपि सर्वस्वमोप जहरिश्णे न दक्षिणात्वर्वं ये

भाव ६१

वद्यपूर्वप्रयोगे वस्तुतो बाधितमेव तथापि परिनिष्पन्नतया तात्स्वबाधज्ञानाभावा-
पत्वेन प्रसक्तौ न काचित् क्षतिः॥ यदा तु प्रतिहर्त्रं यष्ठीहोऽजस्त्वन्यस्तदा तस्मिन्नेव प्रयो-
गे सर्वस्वं देयं न तु पूर्वोपष्ठिहानिनिमित्तकः पुनःप्रयोगः कार्यः॥ न च सर्वस्वदानेनाद-
क्षिण्यस्य विनिहतत्वात्तद्धेतुकपुनःप्रयोगनाद्येप्रमाणाभावः॥ अदाक्षिण्यपुनः-
प्रयोगयोः समुच्चिनयोर्हेतुत्वे नैमित्तिकत्वेन स्वकाभावे इतरस्यानुपपत्तेः॥ अत एव
पृथैव पत्न्यादेरनृणामभावात्केशानामपि न वपनं साहित्यस्य विवक्षितत्वात्तत्तत्वे
वादाक्षिण्यमावे पुनःप्रयोगस्याप्यभावः॥ यदपि च हारोपात्तकर्णस्य पुनःप्रयोगा-
गतयाविधानस्यावश्यकत्वादेव पूर्वप्रयोगे अदाक्षिण्यस्यापे प्राप्तत्वाद्दक्षिणां द- | रामः ६१
मितस्यानुवादत्वमुच्यते तथापि प्रायश्चित्तिकानुवादनियमे वादाक्षिण्यत्वोपे पुनःप्रयोगा-
त्योयदिति रथव्यं वस्तुतस्तु मो ममयमज्येति वस्याश्चित्तिकानुवादत्वेपि पुनःप्रयोगत्वो

पेप्रमाणाभावः॥ न च तस्य संहरथ द्रव्यमात्रे पत्न सप्तत्वान्नपाश्चित्तिकानुवादत्वमितिवाच्यं संह-
रथद्रव्यनाशेपि विश्वजित आवश्यकत्वेन प्राप्तिकानुवादत्वाभिवाराणात्॥ वस्तुतस्तु नाय म-
नुवादः॥ तत्र तदा धार्य्यत्वेन न पूर्वप्रयोगे दातव्य दक्षिणापाः पुनःप्रयोगांगतयाविधाने
पि पूर्वप्रयोगांगापवतके क्रीनलब्धेतास्मिन्नपि तस्मा आवश्यकत्वे नादाक्षिण्यप्राप्त्यभावात्॥
न चैवं पुनःप्रयोगमगस्य ज्योतिष्टोमत्वादेव द्वादशशतादिरूपदक्षिणाप्राप्त्युपपत्तेरस्तत्र
तद्व्यादि सस्यैव स्यष्टमितिवाच्यं तस्य पूर्वप्रयोगे एकविंशत्यादिपक्षकरणेन पुनः-
प्रयोगे द्वादशशतादेरपि प्राप्त्यापत्तौ तन्निवृत्त्यर्थत्वे न सार्थक्यात्॥ उक्तं तु उद्धरन्यत्ने सर्ववे-
दसप्राप्त्यर्थत्वाच्च न चैवं केशश्मश्रुवपनापेन पुनः प्रयोगावाधः॥ तत्र हि द्वेन सहितस्या-
पादेयकेशश्मश्रुगतत्वेनोक्तत्वात्साहित्यावच्छिन्नस्य वक्रियांगत्वेन प्रत्येकं तदंगत्वाभा-
वात्॥ प्रकृते तु अरुणोकहापि न्यायिनापनपदेवत्वात्तरसंयोगपारिवचप्रत्येकमेवक्रि-

भा.दी. ६२ प्राग्वपाहेऽकृत्वा कोऽपि प्राग्न्यादिनापश्चात्ताहिलाद्वगमेऽपि हैःकृलोपेपरस्यलोपः॥ नयागाहू वपा
हमवेश्य कृहापनीलोपत्रयांशुपाश्चिदेवतांतरसंयोगाभावेवापतन्नलोपद्रपः॥ अतः प्रति
हर्त्तुःपरत्वेपूर्वप्रयोगेसर्वस्वं दत्वापुनःप्रयोगेपितद्देयमितिसिद्धं॥ परत्वाद्वप्रयोगाज्ञात
मात्रापच्छेदस्तत्तलिमित्तकाद्वितीयप्रयोगेचप्रतिहर्त्रपच्छेदस्तदातत्रसर्वस्वमेवदेयंतेनै
मित्तकत्वेननित्यदक्षिणाबाधकत्वात्॥ नचपुनःप्रयोगस्यप्रायश्चित्ततयापूर्वप्रयोगां
गत्वात्तत्रतरदयादिसमनेनचपूर्वप्रयोगांगभूतदक्षिणायाःपवातरप्रयोगवर्तित्वमा
त्रविवक्षानरंगगुणविरोधस्यापेनांगभूतपुनःप्रयोगांगसर्वस्वदक्षिणाबाधेनप्र
धानभूतपूर्वप्रयोगांगदक्षिणायाःसबदेयत्वमुचितमितिवाच्यं॥ अपूर्वविधि
त्वाद्व्यायसात्वादिरिहेवप्रसंगेनोत्तरप्रयोगवर्तिदक्षिणायाःपूर्वप्रयोगांगत्वानुप राम
पत्तेः॥ अरुतत्स्या अपिपुनःप्रयोगांगत्वात्परेणानैमित्तिकेनपूर्वस्यबाधात्सर्वस्वमेवदे ६२

यं॥ अहर्गणे॥ द्वादशाहाहर्गणेयद्येकस्मिन्नहस्सि॥ अद्व दहनित्र्यहपुः अपच्छेदो भव
तितदाकृत्स्नस्यावृत्तिस्तस्याग्रयणस्यैवद्वादशाहपदवाच्यत्वेनफलसाधनत्वात्तस्यैवप्राप
च्छेदादिरूपयोगस्याहर्गणत्वात्॥ अस्यस्तुबोत्पत्तिवाक्यप्रत्येकंकरणत्वाद्वादशाहपदेना
पिचसमुदायपिनामवोक्तेःप्रत्येकमेवफलंप्रतिकरणत्वंपक्षेपद्दीपाहानात्प्रकरणान
समुच्चयः॥ अतद्वांगग्राहित्वमपिप्रत्येकमेवतथापिपत्यहंतुसंबंध्यहतायच्छिद्य
तेनकेतुसंबंधोविवक्ष्यते अपितावद्रूपकत्वाचत्कृतुसंबंधिवहिर्व्यवमानार्थंप्रस
र्पन्न उद्गातापच्छिद्यातेनकतुनापजेतेस्यथावगतेस्तस्यचप्रतिसंख्येभेदेवतत्स्या
यारूवावर्तिः॥ तत्स्थायायाअपिचतत्स्यात्माव्यवहितोत्तरमेवावर्तिः॥ संगस्यर्वे
ष्ठ्यसाकरणव्यतिरेकेपोत्तरस्यस्यायामनधिकारात्॥ अंतरस्यवसूत्रीत्याग्गानामप्या
वेनावर्तिःरितिध्येयं॥॥ इति श्रीखंडदेवविरचितायां भाट्टदीपिकायां षष्ठस्य पंचमः॥॥

भा.द. ६३ संनिपाते॥ दर्शपूर्णमासादौ कल्पभेदः स्मृतः वाशिष्ठादीनां नाराशंसो द्वितीयः प्रयाज
स्तनूनपादन्येषामित्यादिना। अत्राहितनूनपातं प्रजतीत्येन स्यादेकस्यैव तिनिमित्तनाय
धेयमंगीकत्याविहितस्याद्वितीयप्रयाजस्यैके मेशाखाभेदेन स्याम्नातयोर्नराशं
सतनूनपातमंत्रयोरव्यवस्थयाविकल्पेन न द्वितीयप्रयाजसंबंधित्वेन प्राप्तप्र
वीशाष्टकंसंबंधमात्रेन नाराशंसस्य क्रियते अत एव नाराशंस इति तद्धितो द्वितीयप्र
याजपरश्चोनुवादः ततश्च परिशेषाद्वतनूनपान्मंत्रे अन्यसंबंधाभिद्धेस्तनूनपाद
न्येषामिस्यपिस्रोज्ञापुसराइतिवद्नुवाद इति। न च नाराशंसमंत्रस्य पशुप्रकारे
पाठेपि दर्शपूर्णमासप्रकरणे पाठाभाव इति केषांचिदुक्तं पुनः पशुप्रकरणे आ
प्रीसूक्ते वैकतेन नाराशंसमंत्रपाठेपि नराशंसो अग्न आज्यवेलितस्य दर्शपूर्णमा
सप्रकरणे पाठात्। अत एवाश्वलायनादिभिरपि तत्रैव समपठित॥ एतु नाराशंसवा राम ६३

कोद्वितीयत्वादिविशिष्टप्रयाजांतरविधिस्तस्य च वाशिष्ठसंबंधित्वेन विधानं द्रन्येषाम
भाव इति॥ तन्न। तथा सति सपिद्यागोत्रत्वरूपत्वं द्वितीयत्वस्य नाराशंस्य सयागो विधाने
पि वाशिष्ठानां तनूनपाद्यागाबाधप्रमाणाभावान्नराशंसोत्तरं तत्करणापत्तेः॥ नाद्य द्वि
तीयपदेन तत्कार्यकारित्वेन नाराशंसविधिः॥ येन तेषां तनूनपाद्बाधकत्वं शंक्येत तथात्वे
सिद्धांते वाशिष्ठानामप्युभयपक्षेन वाक्यभेदापत्तेः। तनेच तनूपादन्येषामित्यनेनान्येषामे
व तनूनपाद्विधानाद्वाशिष्ठानां तद्बाधोपपत्तिः॥ तस्यैकवाक्यत्वेनोपपत्तौ वाक्यभेदाभि
गीकारे प्रमाणाभावात्॥ विशिष्टविध्यपूर्वकमांतरकल्पनागौरवप्रसंगाच्च। अतः पू
र्वोक्तप्रकारेणामंत्रस्यैव वाशिष्ठसंबंधविधानेन कल्पभेद उपपादनीयः॥ स च सीस्रगो
पारिद्वारा अनेककर्तृकेषु सत्रादिष्वप्राप्तः सत्राहीनाकल्पानामप्यधिकार इतस्या
न कल्पो नामेष इति चिंतायामविशेषाच्छिन कल्पानामपि न चैककल्पकरणे आन्येषां वेगुण्य

भा.ब. ६४ प्रसंगात्॥ वाशिष्ठानामपि सत्रयंत्रस्य मुद्वाशिष्ठापत्त्वविधानेन्त्र करणबाधापत्तेः क्रतुप्र
कृपुरुषधर्मत्वेच यदि संख्यापत्तेर्वाशिष्ठस्य नराशंसमंत्रे होत्रेवे स्थामित्राविधानात्तस्य
त्कर्षदिपरिछेदकत्वेन विधानात्प्रयोगेपि प्रयोजककर्तृत्वं तपजमानपरिछेदकत्वेन वा
शिष्ठत्वविधानुपपत्तेः सत्रासे औदुंबरी हमानवदेकवाशिष्ठकर्तृकत्वेप्यन्येषां वैगुण्या
नापत्तेः॥ अतो भिन्नकल्पानामप्यधिकार इति प्राप्ते विकल्पेन प्राप्तयो मंत्रयोर्नियमार्थ
त्वेन वाक्यार्थश्चोयपत्तो नियतप्राप्तो वाशिष्ठव्यापत्तेरुपरि संख्याफलकत्वायोगा
द्वाशिष्ठेतरेषु नेयमप्रमाणांतरवशाद्वाशिष्ठाभिलषितफलसाधनीभूतस्यापूर्णमा
संगात्॥ तद्वितीयप्रयाजस्य रानाराशंसमंत्रविनियोगविधिः॥ अतश्च नराशंसमंत्र
स्यावाशिष्ठेषु विनियोगाभावादेव निवृत्तिरिति न तत्परिसंख्यापावाक्यप्रवृत्तिलत्वे॥ राम
अतश्चायन्नकल्पानामधिकारेपवाला भूतमंत्रपाठे इतरेषां फलानापत्तेः स्यान ६४

कल्पानामेवाधिकारः॥॥ वचनात्तु एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्रापि न
भिन्नकल्पयोरधिकारः॥ द्विवचनस्य युगपदधिकरणावचनत्वेन पदद्वयोपलक्षणावगतत्वात्
तरनंगीकारेपि वाक्यहितस्य वोधार्थपदद्वयोपलक्षणायां अवरूपकत्वाच्च अन्यथा देवता
त्वादेर्व्यासज्यवृत्तित्वानुपपत्तेः॥ अतस्तत्पुरुषस्य पदवृत्तेरुत्तरस्यैकाशेषः॥ अतश्च समा
सादुत्तराद्विवचनं तरस्यैव द्वित्वमाह तस्माद्राजद्वयसंबंधिनो द्वौ पुरोहितौ समा
नकल्पावेव यजेयातामित्यार्थः यद्वा द्विवचनस्य विशेष्यान्वयित्वव्युत्पत्तेः संख्याधिक
रणाद्युत्सर्गतत्वात् एकस्यानेकस्य वा राज्ञो द्वौ पुरोहितौ विवक्षितौ अप्पवादस्य कंशेषं कल्वे
वलत्पुरुषकार्यः॥ इतरथ्यायदृष्टावत्विग्मांगात् राजपदस्यैव्यर्थ्यप्रसंगाच्च अतएक
स्यवराज्ञो द्वौ पुरोहितौ विवक्षितौ॥ पूर्वपदे लक्षणायां प्रमाणाभावात् पुरोहितद्वयगतद
स्यापादेपश्चायामेकत्वस्य विवक्षितत्वेनेकस्य राज्ञः पुरोहितद्वयानावाच्च कर्मधारयप्र

भा.प.
६५

वाप्यमितिप्राप्ते ब्राह्मणानामेव पौरोहित्यश्रवणात्कर्मधारयानुपपत्तेर्द्वंद्व एवायं न तत्राप
रद्वयेलक्षणापूर्वपदविकरणं वा च न तत्स्य निशकतत्वात् न च साहित्यप्रतीतस्यैवलक्षणा
तत्प्रतीते रानुमानीकत्वेनाप्युपपत्तौ लक्षणायाः प्रमाणाभावात्॥ समाहारे परं एकत्वान्व
यार्थपरद्वंद्वेपि समुच्चयलक्षणेति विशेषः॥ वस्तुतस्तु इतरेतरद्वंद्वे द्विवचनस्याभावेन साहित्य
प्रतीतेरानुमानिकत्वाद्योगात्स्वरूपं प्रतीयमानस्यैव चापलाक्षणिकत्वमावश्यकमेवं तथा
पि तल्लक्षणाया एकशेषेपि समानत्वेन सर्वपदेष्वाविशेषकत्वसूत्रोक्तरूपत्वादद्वंद्वाप
पत्तिः॥ अत एव राज्ञः पुरोहितस्य च भिन्नकल्पयोरप्यधिकारः॥ पुरोहितोपि च तस्यैव रा
ज्ञः पुरोहितत्वस्य संबंधिकत्वेन राजप्रतियोगिकत्वावश्यंभावे ऐहिकस्यैकराज्यप्रति
योगिकत्वरूपस्यायुज्यफलकत्वस्याप्यत्रोपपत्तेः॥ अस्तु वा अन्यस्यापि भिन्नकल्प
त्वं च यद्यपि न तारात्रांसमंत्रे राज्ञो नुराधेन पुरोहितस्यापि न [illegible]स समानकल्पस्यैव सं

राम
६५

मवेनतादृशापौरेवतयोरधिकारोपपत्तिः॥ तथापि सोमफलचमसरूपभिन्नकल्पयोरप्यधि
कारः तत्रापि न विकल्पः स्तः प्रापणिकत्वात् निमित्तत्वाच्च नैमित्तिकेन सोमस्य बाधात्॥ त
त्रापि॥ ॥ तत्रैव यजमानास्त ऋत्विज इति श्रुतं॥ तत्र न तावद्यजमानानां ऋत्वपजनकर्तृत्वरू
पऋत्विकत्वमात्रपदद्वयोः प्रथमान्तयोः समानाधिकरण्येनान्वयः॥ स्वामित्वमदृशा इति सा
पेन प्राप्ततया वाक्यवैयर्थ्यापत्तेः॥ अतो ऋत्विक्पदं परिक्रयक्रीतऋत्विक्परं॥ तेनाप
च न यजमानपदस्य यागकर्तृभिन्ना इत्येवं समानाधिकरण्येनान्वयः॥ स्वात्मनि परिक्र
या संभवेन बाधात्॥ न च ऋत्विक्पदेन प्रकृतौ वस्तुतो येपरिक्रयक्रीतास्तत्कार्यकर्तृ
न भिधीयते न सह यजमानपदस्यामेदान्वयः॥ एवं तयोः परस्परान्वयस्याव्युत्पन्नत्वात्॥
विशिष्टकर्तृलक्षणायेक्षया तत्कार्यलक्षणाया स्वऋत्विक्पदेनाप्यत्वाच्च अतो पोहो
तासोध्वर्युरिति वृज्जघन्ये ऋत्विकपदस्य तत्कार्यलक्षामित्वा यजमानशांस्कारायत्वेन तद्धि

भा.ष. ६६ धीयते न यच्छब्दप्राप्यस्यान्यां यजमानस्यैवोद्देश्यत्वप्रतीतेः॥ अत एव फलपरत्वात् स्वाकृत
फार्थकल्पनापि न दोषः॥ एवं क्वचिद्द्विकामत्वाविशेषात्त्रयाणामपि वर्णानामार्त्विज्यसंस्का
र्यकल्पत्वावगतेः त्रयाणामपि स्वकेऽधिकारः॥ अत एव द्वादशाहे बाहरिं ब्राह्मणस्ये
त्यादि लिंगमपि संगच्छते॥ एवं च यजमानसंस्कारद्वारेण क्वचित्क्रतूपकारार्थे प्रकृतत्वे तप
कारस्यापि सिद्धेर्लेतद्दृष्टपरिक्रयादिनार्त्विज्यं गरुहं पाऽऽदनामित्यपि दृष्टमिति। प्रापि
ज्ञापकसत्त्वे व्यवहितान्वयकल्पनया शाब्दबोधस्य लोके दृष्टत्वादिहापूर्वविधित्वार
घरूपाप्राकृतकल्पनादिदोषभिया यच्छब्दस्य व्यवहितान्वयेन सद्रूपयाप्तिमात्रस
चनेन वाक्येन लिंगकार्यस्यैवोद्देश्यत्वमंगीकृत्य यजमानाः कर्त्तारो विधीयंते न चैतावता
न त्वविकृतेः कल्पनायां यजमानानामपि क्वचिद्विकल्पस्य साधितत्वात्॥ वरणादिवि राम
धर्मनीतयत मानभिन्नत्वं परमतिदेशप्राप्तमुपदेशेन बाध्यते॥ नत्वेनावलाबाह्मणकर्तृ ६६
कत्वमपीति तदनुमहाय ब्राह्मणानामेवाधिकारः वा हैं द्विवारि द्रष्टौ नेत्व हीनाभिप्रायेण॥

वाशिष्ठानां॥ प्रकृतौ वाशिष्ठो ब्रह्मा वैश्वामित्रो होतेति ब्रह्मत्वाद्युद्देशेन वाशिष्ठादिविधाना
त्तयोश्च विरुद्धकल्पत्वात्तत्रैव विकल्प इति प्राप्ते य एव कश्चित्सोमभागानां प्रीते स एव वा
शिष्ठः स्यात् अथवा देनऽपयेन प्रदृस्य च विधिविस्थ वाशिष्ठपदस्य लक्षणया सोमभागाधे
तमात्रपरत्वाद्वसायाः पृच्छ कृपार्थविधित्वाभावेन वैश्वामित्रसमानकल्पानामेवाधिकारः॥
भाष्ये तु य एव कश्चित्सोमभागानधीयीत स एव ब्रह्मा भवेदिति वाक्यमुदाहृत्य तस्य
विधित्वांगीकारेण वाशिष्ठो ब्रह्मेत्यस्य तत्पर्यवादत्वं ततो कार्थविधिभाव इत्ये
कं विहारस्य॥ सारस्वत सत्रे परार्थे वा एते स्वर्गलोकं यंति येनाहिताग्नयः सत्रमास
त इति विधौ सत्रमहणस्य प्रकरणेन संकोचे पुमाशाभावात् सर्वसत्रेष्वपि अनाहिता
ग्नीनामपि आहिताग्निसहितानामधिकार इति मन्यते॥ अत एव सारस्वतसत्रवदेवे
तरस्मवं सत्रव्यतिरिक्तविषयमेवाधानगतात्मनेपदं॥ इषिमोमोत्तरकालतातुक्तं तंत्रा

भा॰च॰ ६८

दैक्षं केचित्तास्त्यांइषि सोमकर्तारमपेक्ष्योपतेत्रलोवा॥ न हि तत्रोपि सोमसमातकर्तृकत्वम
पि विधीयते॥ वाक्यभेदप्रसंगादिति प्राप्ते स्यक्रोपदेपाठानेनवाक्यभेदाभावादिषि
सोमसमानकर्तृत्वावगतेः तत्रचावानगतालभनेयदानुरोधादाहिताग्नियाजकर्त
कत्वावगतेः सारस्वतसत्रप्रकरणस्थ विधिवाक्ये नैवमग्नो ह्यास्वित्तत्रैवानाहिता
ग्नेरप्यनुज्ञानो दाल्भेयदानुरोधेनैवेरुरसत्रे पुरुषाहिताग्नीनामेवाधिकारः॥॥ जु
ह्वादीनां॥॥ जुह्वादिपात्रेषु तु आल्भेयदानश्रवणाग्निहोतुरीसमानत्रुपालाभ्वपस्य
कस्यपि यजमानस्य पात्रेपि सत्रेधिकार इति प्राप्ते यस्यैव पात्रै रूपक्रान्तः प्रयोगस्त
स्यैव यजमानस्य सत्रप्रयोगमध्ये कदाचिन्मरणे पदितत्पात्रैस्तस्य दाहस्तदा सत्र
वैगुण्यं यदिनदाहस्तदा आहिताग्निमग्निभिर्दहंति यज्ञपात्रैश्च दक्षिणे हस्ते जु
हूमासादयती त्यादिनाविहितस्य पात्रप्रतिपत्तिरूपर्व- कृस्य पात्रगणाकरहस्य लोपप्र

राम ६८

संगात्॥ अतः साधारणान्यन्यानि पात्राण्युपलाघ सत्रेधिकारः॥॥ पुरुषकल्पे॥॥ पामुविक
तिषु सप्तदशसामिधेनीरनुब्रूयादिति श्रुतेतासु वैश्यस्यैवाधिकार॰॥ प्रकृतौ सप्तदश्या
वैश्यस्य सनेनततद्धिकलिभारत्तस्थसामदश्यानुवादेनैव वैश्यस्य कर्तृत्वेन विधाना
त॥ पंचदशहोनापदे सामदश्य विधौ पांचदश्य बाधापत्तेः॥ वाजिधानापि सत्रतु व्यव
स्थार्थत्वात् तथांगीकरणमिति विशेषः॥ अतएव वैश्यकर्तृकसामदश्यानुरोधेन तस्यै
वतास्वधिकार इति प्राप्ते सामिधेनी साधिनीभूत सामदश्यपादेशो विशिष्टो देशापप
तेः साप्तदश्यमात्रो देशोच विकल्पपूर्वे साधनीभूत सामि॥ धेनीनामेव विशिष्याप
स्थापकाभावेनानुनादायोगा द्यप सामदश्य वपि विधानापतेः प्रकरणानुग्र
हाञ्च वैश्यो देशोनैवतद्धिकारिके दर्शपूर्णमास संबंधि सामिधेनीवृत्तित्व सं
बंधेन साप्तदश्यं विधीयते॥ अपांचवैश्यस्य निमित्तत्वं॥ विकृतौचानेमित्तिकत्वा

भा.प. र्थं पुनस्त्र्यवृणामिति सर्वाधिकारः॥ इति श्रीखंडदेवकृतै भाट्टदीपिकायां षष्ठस्य षष्ठः
६८ पादः॥ ॥ स्वदानो॥ नि॥ श्वजिति सर्वस्वं ददातीति श्रूयते॥ तत्र पित्रादीनामपि ज्ञातित्वेन स्व
शब्दवाच्यत्वाद्दानवदेव दानं॥ न च पित्रादिषु पथेषु विनियोज्यत्वरूपस्वत्वस्य स्वामीति नम्
क्रूपस्य विभागपरिग्रहाधिगमोष्विताहि स्वत्वहेतुभावेनासंभवात् पित्रादौ च्यानिरेकेणा
मीपत्वाभावात्स्वत्वस्याघटितददातिकर्मत्वानुपपत्तिः कन्याप्रदानादेरपि स्मृतिप्र
त्तत्वेन तत्रापि स्वत्वांगीकारात् अस्तु वा तद्दृष्टौ वेन परस्वत्वापादनमेव दानं इति प्र
त्रे परविधेयीकरणमात्रे स लोके दानशब्दप्रयोगात्स्व। स्वत्यागपूर्वकपरस्वत्वापा
दनमेव दानपदार्थः॥ न च पित्रादेः स्वत्वे प्रमाणमस्ति स्वत्वहेतूनामभावात् कन्यादा
नादेरदाने गौणत्वात्॥ न चेह तदाश्रयणं युक्तं॥ स्वशब्दस्य स्वत्वाश्रयीभूतधनपर
त्वेनापुपपत्तेः॥ किं चात्र स्वशब्दः पुंसैकशेषे वा ज्ञातिधनेष्वपि वर्तते॥ सर्वानुग राम
तैकशक्यतावच्छेदकाभावात् अतश्चैकस्मिन्प्रयोगे एकस्यैवार्थस्य ग्रहणाद्धनत्वादस्य ६८

नुरोधेन धनस्यैव ग्रहणं॥ ॥ न भूमिः॥ ॥ येयं महापृथिवी तस्याः सार्वभौमत्वेन तत्तद्दानमि
ति प्राप्ते सार्वभौमस्यापि तस्याः स्वत्वं अपरस्यापि श्राद्धस्वामिकत्वं न गृहक्षेत्रादिविषये स्वत्वस्व
त्वोत्सारकत्वात्॥ महापृथिव्यां तु राज्यमात्राधिकारस्यैव जयेन संपादनात्॥ राज्यं हि स्व
विषयपरिपालनकोद्धरणरूपं॥ तन्निमित्तकं च तस्य कर्षकेभ्यः करादानं॥ अतस्तस्य
स्वत्वं दानमपि स्वतावन्नौ च॥ न त्वेतावता तस्याः स्वत्वं॥ तथात्वे वनगततृणकाष्ठादावपि
स्वत्वापत्तौ तत्स्वत्वोत्सारकमपरिग्रहविधिविरोधापत्तेः॥ तद्विषयस्वत्वप्रजादिगृह
दिष्वपि स्वत्वापत्तेः अतस्तासां नैव देया॥ माउलिकेनापि मंडलं॥ परिक्रयादिलब्धं गृह
क्षेत्रादिकं तु देयमेव॥ ॥ अकार्यत्वात्॥ अश्वादयः केसरिणोपि सर्वस्वेन देयाः॥ न केस
रिणो ददाति नोभयतोदतः प्रतिगृह्णातीति तेषां पर्युदासात्। यद्यपि चातुराश्रम्याधी
तेनानेनरागातः प्राप्तस्यैव मित्रादिभ्यो स्वदानस्य यथाप्राप्तं द्रष्टव्यादिष्ठीतोत्सरे अ

भाष ६९ नियमेन विहितस्यापि चाश्वविषये ऐहिकस्य दानस्य प्रतिषेधस्य वृत्तिः पतेत् तथापि वि-
श्वजित्प्रकरणे ह्येनानेन पर्युदासस्यैव सर्वाचयदेन नियमतस्यैव सर्वदानस्य विहि-
तत्वेनाश्वाद्योपि तत्ववत्त्वेवं घतयानिषेधयत्योर्विकल्पस्यापरिहार्यत्वात्। अथ ए-
वमपि चैयं वाक्यद्वयकल्पना। इतरथा अश्वप्रतिग्रहे प्रायश्चित्तकरणाद्यालौकिका-
श्वदाननिषेधकल्पनानुपपत्तेः॥ वोभयतो दत्तः प्रतिगृह्णातीति तु पुरुषार्थः प्रति-
षेधो दानलक्षणयागावयवभूतदानस्य परत्वप्रतिषेधेयं वस्तुतस्तु प्राकृतस्यैव नैमित्तिक-
स्य सर्वस्वदानस्यानैमित्तिकत्वात्पर्यविधेयत्वस्य वक्ष्यमाणत्वाच्छ्रूयते च दक्षिणापर्य-
भागे इष्ट्येवाश्वानां प्रसक्तेरनारभ्याधीतेनैव तन्निषेधोपपत्तेर्न विश्वजित्प्रक-
रणे वाक्यान्तरकल्पनमपि॥ अतएव ज्योतिष्टोमतद्विकारानंगे सर्वस्वदानेऽश्वानां दान ६९
दाननिषेधमेव॥ ॥निरूप्यताम्॥ ॥यत्तिविदिसुरुषस्याय भोभोभयंस्वकुप्याद्यापनामनगा

वादित्तत्संवदतीति न्यायावधारणा यस्यापि पत्नात्तिसोपि तदुजपिता दद्या द्रूल-
र्प्पविधिलाभादिति प्राप्तिविधिः विधिप्रकारपत्ते श्वो ऽकप्राप्त दानानुवादेन ह्य दशरा-
त्रवाधेन सर्वतायात्र विधानास्यक्ति द्रुःस्वसेधेष सर्वशब्दस्योपयुक्तो अप्राप्ति दृ स्वत्वो-
ऽत्रेनाक्षेपकत्वानुपपत्तेश्च नार्तपिता देयो॥ ॥सद्भूम॥ ॥ धर्मार्थं मत्स्यर्थं वा परि-
चारकत्वेनावस्थितः ततोऽपि न देयः तत्रास्य स्वत्वाभावात्॥ परवद्यपत्वान्नस्नुप-
गयसंभवाच्चवैतदसारदयस्ते देयपूर्व॥ ॥दक्षिणाकाले॥ ॥दक्षिणाकाले य-
त्रास्य स्वत्वं तस्यैव दानं न तु ततः प्रागपि यत्प्राप्तो यभोगं वचनं तदनुपयुज्यपत्वेन
धारयितव्या देयं धारकप्रयोजकत्वप्रयाणाभावात्॥ भाविनस्तु तदानीं स्वत्वाभावादेवा-
दाना दानं न च क्वाचित्कस्यापि प्रतिश्रवमात्रेण स्वत्वोत्पत्तिः तथात्वे दत्तस्य पुनर्दानासं-
भवेन देयं प्रतिश्रुतं चेदेवेति विधिविरोधप्रसंगात्॥ ददातेः समर्पणमात्रार्थत्वे तस्य-
पापसंगाच्च प्रतिश्रवणे न च स्वोपभोगस्य दानायोग्यतापरं जायते॥ उक्तं दाननियमा

भा.ष. नाप्यद्यास्मै दानिश्रुतमित्यस्मै दाननिषेधाद्वचनस्वत्वेनि वीपवत् अत्रोपपात॥ ज्यो
७० तिष्टोमे ताद्धकारे स्त रथ यत्र सर्वस्य दान मान्नातं तत्र च नाकर्यातत्वेन कर्मारंभ रथवति
धाय जमाने नात्मीयं धनवचना घवस्थापितं मस्यार्थं के त्वर्थं दक्षिणार्थं चेति॥ तत्र स
र्वस्वत्वाविशेषात्त्रिविधस्यापि दानं॥ ननु दक्षिणार्थं भागस्यैव सर्वता तस्य प्रकृतौ
दक्षिणार्थत्वे सर्वस्वदानविधिवैयर्थ्यात् दभागत्रयस्याप्यविशेषात् दक्षिणार्थो प
स्या गादतिव्यपदेशानुपपत्तेः अतश्च प्रत्यक्षवचनोपदिष्टं सर्वस्वदानवशेनातिदे
शाप्तकर्मीरोपलोपः॥ परार्थानां प्रधानत्वा दंगभूतदक्षिणानुरोधेनवाधस्यप्रप
बलावलन्यायेनानुपपत्ते वा किंचित् वैशिष्यं सर्वमन्यत्वप्रदेपतामिति प्राप्त दक्षिणा
र्थनानिर्दिष्टस्य तत्संबंधप्राप्ते सर्वता यान्त्र विधाने लाघवमिति तस्यैव सर्वं दानं न चै दान
वंपकानावपितस्य दानापत्ते रत्र विधिवैयर्थ्यं॥ इतरथा तस्य दक्षिणार्थत्वानुपपत्ते ७०
रितिवाच्यं पंथे तावता केवलिशान्नानुमेपुरपितु सर्वस्वेनेव नेन वचनेन दादशानेनान

त्यस्तेम वेत स्यापि दक्षिणार्थत्वात्॥ अत्रच दक्षिणार्थ भागस्यैव देयत्वेव स्थितेपर्वत नानिषड
विकरणानिष्फलावि नयेतिकेचित्॥ वस्तुतस्तु पित्रादीनामपि दक्षिणाभागांतःपाते नविद्या
पपन्नेन कृत्वाचिंताल्ं॥॥ अदोषे॥॥ अस्य परात्रो हीनस्तस्य विश्वजित्सर्वपृष्ठ महत्तेनो
भिहोत्रंवं: षडहस्ततो भिजितय शुकामो ह्रतेनय जेति श्रुतिः॥ तत्राविश्वजिति प्र[illegible]कारप
तराधिकरणो तन्यायेन कर्पातरेना भावि दे शोनेका हकानुपदितविश्वजितोधर्मः तर्वसं
अन्येषु तु गुणात्वा द्वादशाहे तो ज्योतिष्टोमिको द्वादशाहे चपति सप्तसं भे दे नाति देशोपि प्रयो
गोकत्वे नकेवैकत्वस्यदशोयवक्ष्यमाणत्वा तदानस्य योपादक्षिणायाअपितत्रैणाद्वं
तेवादेयत्व प्रसक्तावन्वहं द्वादशशतं दक्षीत्यनेनावृत्ति फलकोन्वहकालो विधीयते
द्वादशशतस्यापितु विधानेवाक्यभेदापत्तेः प्राकृतयावीपक्षादिलक्षणगामात्रोपल
क्षणं ततस्ते न पादक्षिणातंत्रेण देयत्वेन प्रसक्तातां प्रत्यहं दद्याती ति तद्वाकार्थं॥ तदि

भा.प. ७१

हार्थं षड्रात्रेणानातिदेशप्राप्त्या स्याद्विश्वजिद्धर्मानुग्रहप्राप्त्या सार्वोपगमयोनुग्रहस्य प्रा
प्तत्वाद्वादशशतस्यैव तत्रैकोपकारकप्रसक्तेः स्यैवान्वहमिसनेनावतिकरणाद्वा
दशशतमेव प्रसहे देयमिति वार्त्तिककाराशयः॥ भाष्यकारीयस्तु अथ रात्रप्रकरणास्ते
तैव हीप्रतेवारषपशुभिर्यो विश्वजिति सर्वस्वं ददातीत्यनन्यथासिद्धलिंगोपष्टंभप्राय
स्यादिनातत्कल्प्यविधिनैव वा सर्वस्वविधानादायपवसर्वेषु चाहःसु सर्वस्वं देयमि
ति॥ ॥विकारः॥ ॥ प्रकृतिभूते विश्वजिति द्वादशशतादिन्यूनेन च यस्यापि सर्वस्वपदवाच्यते
पपतेस्तद्दृतोप्यधिकार इति प्राप्ते प्रकृतौ ज्योतिष्टोमे पद्येतावतान्तवि जोनानमेपुरपि
तु सर्वस्वेनेत्यनेन द्वादशशतसाध्यायायानतो सर्वस्वविधानान्नत्रचतद्धिकस्यैनपो
गपतया प्राप्तेस्तादृशस्यैव चात्र यक्षप्राप्तस्य नियममात्रकरणाद्वादशशतादधिकध
नवतस्तु विश्वजित्यधिकारः॥ ॥ अपरिमिते॥ ॥ आधाने स्कारे यायद्देयाद्वादशाव
याश्वतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयमिति श्रुतं तत्र अपरिमितशब्दः राम ७१

परिमाणमुखत्वमत्र पंचबहुत्वसाभिधत्ते न च परिमाणमुखत्वस्य हननं संभवतीत्यतः प्रकृतपरि
माणमुख्यत्वमर्थः॥ तेन प्रकृतपरिमाणप्रतिषेधः स्वाद्यमिति प्राप्ते ज्ञातपरिमाणोपि वा
हुल्यमात्रेणालोके अपरिमितशब्दप्रयोगाद्बहुत्वेशक्तिः। ततश्चाश्वकर्णादिवत् रूढ
यावाधालायस्त्वं परिमाणप्रतिषेधः॥ अपरिमितशब्दस्य नञ्समासत्वे तद्घटितेन
स्य नञः क्रियान्वययुक्तस्य भावेन निषेधायोगाच्च प्रकृतपरिमाणानामनेकत्वबल
लेनैव विकल्पयाज्ञानिषेधवैयर्थ्याच्च प्रकृतपरिमाणातिरिक्तं नियतपरिमाणकद
नो। तरविधौ गौकारेचलत्तणाद्यापत्तेर्वंबहुत्वावच्छिन्नद्रव्यकदानं नरविधिरेवा
यं बहुत्वस्य चापेक्षिकत्वेन पूर्वकृतस्य ह्रस्वो वधिकत्वनिश्चयात्तदपेक्षयाधिकमेवा
परिमितं॥ परकृति॥ ॥ दर्शपूर्णमासयोरितिहस्मादव उकुपाधितामा न्नेपचतेति श्रु
तं॥ इदंचैककर्तृकोपाख्यानं परत्वात्परकृतिः॥ अयं चारण्यपाठान विवेकशेषः॥ बहुकर्तृ
कोयाख्यानपरं चवाक्यपुराकल्प॥ सत्रे उत्मुकेः सह पूर्वे समाजग्मुस्तानसुरारक्षांसि निजघ्नु

भाव· ७२

रितिअपंचगव्यहूपतेरेवाग्निषु निर्मथ्य निर्वपेरन्निति निर्मथ्याग्निसंसर्गस्तु सर्वथैवानुक्तौ
सर्गानिष्टकं संस्तद्विधेः शेषः॥ न तु स्वतंत्रो विधिरित्योदुंबराधिकरणे निर्णीतमेव परस्
रूराहरणं तु पराविविस्तराकृत्वा चिंतयाविचार्यते॥ वसिष्ठगोत्रोत्पन्नाधिकारके
शेषणं मासौ देशो न तत्कर्तृसंस्कारार्थं तथा वा पाषपाकविधिरिति तद्वत् एव माष
याके विकारो वैरूपानियत्तक सास्य रूपवत्॥ न ह्यत्र प्राच्यत्व वसिष्ठगोत्रत्वे तु वचं
येन तत्कल्प्यविधेः सामान्यविषयत्वस्यादिनिष्पन्नेस्तुस्तु यापत्तेनो यातस्य वसिष्ठ
गोत्रत्वस्य विधेयमाषपाकविशेषणत्वकल्पने प्रमाणाभावान्माषपाकमात्रविधा
नेन सर्वाधिकारः॥ सहस्रसंवत्सरे॥ ॥पंचपंचाशतस्त्रिवृतः संवत्सराः पंचपंचाश
तः पंचदशाः पंचपंचाशतः सप्तदशाः पंचपंचाशत एकविंशाः विश्वसृजामयनं स
हस्रवत्सरमितिश्रुतं॥ अत्र पंचाशच्छब्दः संख्यापर एव त्रिवृद्धा वत्सर [illegible] रात्रौ रान ७२
तुलक्षणया त्रिवृतो मकसंवत्सरसाध्यक्रतुचतुष्परो पंचाशच्छब्दवि शेषणं

पंचदशाद्योऽपि तेन तादृशावृत्तिवर्तिनी पंचत्वसंख्यावच्छिन्ना पंचाशत्त्वं लक्ष्येति पविष्टोकान्वपवे
लायां पर्यवसितार्थः॥ तदिह त्रिवृदादिस्तोमकत्वं यद्यपि सामान्यसंबंधेनाहन्येव तथापि
तादृशाहर्घटितत्वात्संवत्सरेपि तत्संभवतीति संवत्सरशब्दो लक्षणया वत्सरसंवत्सरमेवा
भिधत्ते तेन मनुष्याणां सहस्रायुष्ट्वाभावात् तत्प्रयोगाधिकरणनिराकृतोपि श्रुतिबलादुध
वीदीनामेवाधिकारः। तेषां त्वग्न्याद्युपसंहारासामर्थ्यान्मनुष्यानेवावारस्तायुनलब्ध
सहस्रायुषां संवत्सरस्ययनारेरेवतावदायुः संयारेनसामर्थ्ये प्रयाणाभावाद्वेतामुर्वैयुरु
षइतिश्रुतेश्चैकेनारब्धस्य पुत्रादिपारंपर्येण समापनमिति कुलकल्पो वा॥ शास्त्रफलं
प्रयोक्तरीतिन्यायस्य विनावचनमपवादे प्रमाणाभावात्तमसत्कर्मानुष्ठानाभावे विकल्पा
नवकापि नोपफलानुत्पत्तिप्रसंगात् सत्रारंभादेव सहस्रायुष्ट्वं जायत इति वा कल्प्यं॥ एतादृशाव
ल्पनेपि प्रमाणाभावात्पंचपंचाशत इति पठमानाभिप्रायासंख्या- तेनेकोपि त्रिवृत्सोमक

भा॰प्र॰ ७२ पा॥पु॥ संवत्सरः पंचपंचाशत्संख्याकैः यजमानैः संबंध्यमाना सा वत्संख्या इत्युपचर्यते अ
तश्च चतुःसंवत्सरमिदं सत्त्रं सा द्व्यशतद्वयं यजमानैः कार्यमिति वा पक्षांतरं मं॥ अस्यापि
बुद्ध्यावस्थं तम नारोहात्सप्तदशावराः चतुर्विंशतिपरमा इति ज्ञातिदेशिकपरिमाणबाधा
पत्तेश्चानुपपत्तिः॥ तस्मात्संख्याशब्दः संवत्सरशब्दे गौणमाश्रित्य ग्राम मनुष्यादिका
रः समर्थनीयः॥ तत्रापि संख्याशब्दः योमुख्यत्वादेकार्थनिश्चय हा मध्यां चेन्न स्वार्थ सा
गः॥ संवत्सरयदतु जघन्यत्वात्सो रचो हादिमौ गुणो काथ त्वाच्चुनिश्चयामसमर्थो भवतिगौ
णः॥ संवत्सरः पीयासः संवत्सर इति रशोनाम्ना स्वबुवेति रुकःपक्षः॥ तत्रापि त्वशक्तिस्तत्स्व
रूपे नहासाधना दूर्ध्वं सह समासपर्यंतं जीवनं संभवति अतः संवत्सरशक्ति मा वेद्यइ
त्यारोपयदिति प्रयोगाद्यहरह रात्रिर्षिपरः॥ प्रति मानशब्दविशेषणत्वेन संवत्सरशब्दो
नतस्य ह्यहर्हरात्रिषु प्रयोगः॥ तेन त्रिवृद्धादि शब्दसाम जस्यादिवसेषु संवत्सरशब्दः॥ त्रि
वृदादिपदैर्हि स्तोममात्रवाचकैरपित द्विशिष्ट अहरेव लक्षणया प्रकाश्यते तत्संघलु ल राम ७२

क्षितत्वस्य पायालस्यतावच्छेदकागोरवांगीकारेणवा अतस्तन्निया संवत्सरपदं दिवसपरमेवे
तिसिद्धं ततः इदं चकृतादियुगांतरेष्वपि मनुष्याणां शतमेव परमायुरिति कल्पाचिंतयाः परं तु स्म
तिपुराणेतिहासादिप्रसूत साधकबतरयुष्ठपयागादिफलस्याने कसहस्रवत्सरपरिमितस्यायु
षो पि प्रकृतश्रुत्यसंभवस्य प्रामाणिकत्वं एतत्राय कबलेनैव शतायुर्वै पुरुष इति श्रुतौ
शतायुः पर्युदस्तमिति विग्रहः कलियुगाभिप्रायत्वं वा आश्रयणीय तत्रिवृद्धादिशब्देन अ
हःसंघमेव चत्रिवृत्स्तोमकाहदिपितत्व संबंधेन लक्षयित्वा संवत्सरशब्दोपपत्त्याश्र
तस्य वसत्त्रं च गोवर्धादिव युगांतरस्थ तावत्युष्वमनुष्यपरमिति ध्येयं न हिमिमां
स कमतेयुगादिव्यवस्था लौकां तत्तद्युगधर्मव्यवस्थायकस्मार्त विधीनां निर्विषयत्वा
पत्तेः॥ ॥इति श्री खंडदेवकृतो भाट्टदीपिकायां षष्ठस्य सप्तमः॥ ॥ इषिपूर्वकत्वात्॥ ॥ सं
ति चतुर्होतृ संज्ञका मंत्राः पृथिवी होता द्यौरध्वर्युरित्यादयस्ते उपाहोमार्थ विहिताः॥ तत्र

भा.ध. ७४

येतावत्कालत्वर्थः पुरुषार्थोऽनपिज्ञावचनात्क्रतुप्रयोगमध्यवर्तिनस्तेषु विवाहस्यैव नास्ति ।
येपि पृथगरब्धाः ताः काम्या उपायास्तेष्वपि विवाहस्यैव आहिताग्न्यनाहिताग्निसाधारणत्वात्
येतु ताः दर्शाहोमास्ते वायवे हवनीये जुहोतीत्यनेनाहवनीयाधिकरणकत्वस्याभिहितत्वाद्धिते
रहोमवदेवाहिताग्निमात्राधिकारकत्वं ॥ यत्तु स्थाने अनाहिताग्नेरिष्टिरितिचतुर्होत्रा संनिधौ
क्वचनेतयेय मनाहिताग्नेः क्रियाजयादिहोमा लाइष्टितुल्यत्वे व नेष्टिहोमस्य मात्रानुवादेन
जयाभिज्ञापकतयानानुपपन्नापदितुविध्यंतरशेषत्वाभावे नार्थपादत्वानुपपत्तेर्जयेड
ष्टिहोमस्यकप्पमप्यनुपपत्तेश्चापयेयस्त्राग्रघटितत्वमहोस्यपाद्यचतुर्होत्रहोमरूपेष्टि
ष्टिहोमस्य पूर्णागीकारेणाविधिरित्याश्रीयेततथापितस्याहिताग्निपरिसंख्यायां
त्वेप्रमाणाभावात्सिंद्धपित्तपत्नवदुभयाधिकारकत्वमितिप्रातेप्रसस्यवचनेनानाहिता
ग्नेः कर्तृत्वविधौ ततएव स्मार्ताग्न्यधिकरणत्वप्राप्तेराहवनीयाधिकरणाकत्वस्यासंभ
वीदेवबाधात्परिसंख्यात्वानायत्तेः रनाहिताग्नेरेवाधिकारः ॥ पिंडपितृयज्ञेतुएवमनाहि

राम ७४

ताग्निरितिवचनेनाहिताग्नेरप्यभ्यनुज्ञानादुभयाधिकार इति विशेषः ॥ ॥ उपनयनं ॥ ॥ उपनय
नांगमन्तृताहोमाः येआचार्यकर्तृकास्माणाककर्तृकाश्चाभावेपि उपनयनहोमाणवकस्त
स्कोराय्यान्वयविवाहं नत्वेयेतावदाचार्यकर्तृकास्तेषामस्याप आचार्यस्याहिताग्नित्वे आ
धानगतात्मनेपदविरोधाद्दाचार्याग्निषु कार्याः च्छपितु लौकिकएवाग्नौ ॥ येतु माणवककर्तृ
कास्ते सुतरां ॥ केतुविधीनामिवोपनयनांगमन्तृहोमानामपि आधानाप्रयोजकत्वात्तः प्रयो
जकत्वेपि वाश्राधानस्येतरकर्मवत्तज्ञानीक्षपकत्वाभावेनोपनयनास्यैवकर्तुर्माणव
कत्वाच्च आक्षेपकत्वेपि वोभयाधिकारकस्याधानस्य भार्याभावेनुपपत्तेः भार्याप्या
प्त्यात्वाभार्यामधिगच्छेदिति समावर्तनोत्तरकाले विवाहविधानेनपूर्वमसंभवात्
न्नचप्रयोजमानुरोधेनकालादिबाधः स्यतहाकस्यनिविषयत्वापत्तेः नचापस्तावर्ये स
रांतरकरणोकाल्तविधिः ॥ धर्मेचार्थेचकामेत्वा ह्रियर्यालोचनयाधर्मार्थयमपस्तावर्येचराहंतं

ना॰ध॰
७५

रानुपपत्तेः रक्षिप्रायामपि स्वतंत्रकालाम्नानेन क्रतुविधिनायाधानाद्युपनत्वेस्वरारक्षिपा
प्रयोजकत्वाभावाच्च । अतएव नविरक्तस्य कुमार्यस्य रक्षिप्रा किंतु आश्रमांतरमेव । किंचो
पनयनात्सर्वमाधानं करणोजातपुत्रत्वाधानकाललोपो स्वर्वर्षत्वाद्युपनयनकाल
लोपोवाप्रसज्येत ॥ अतस्तत्रापि लौकिकाग्नावेव ॥ ॥ स्थपतीष्टिः ॥ ॥ निषादस्थपतिं ग्रा
मामितिविकृतित्वादिष्टिर्देशेनाहवनीयादिप्राप्तौ तेषामाधानाधीनत्वादस्याधानमस्य स्वतं
त्राधानविधौ निष्ठादृष्टिरेव तस्याधानं प्रयोजयेदितिनिप्राप्ते सत्यपि तस्याग्निजनकास्तेज
नकीभूतस्याधानस्याब्राह्मणादिकर्तृकत्वेनैवास्मत्त्वानिषादकर्तृत्वेनतानिनिग्निष्यस्तोप्र
माणाभावास्वकर्तोपरषयुक्तागत्यपजीवनेनैवाहवनीयादिप्राप्तेरेवाभावाच्चनतेषु सा वि
धायास्ततद्यातिरेकेणानिषादेष्टेरेवासंभवात्तदुपायस्यलौकिकत्वेनासंपोपपत्तिरिति
वैषम्यं तेनाहवनीयाद्यनासंपकत्वेपिपत्रश्चेचनहोत्ययंस्यात्संचस्रसंस्कारांके त्वालौकिका राम ७५
ग्नेप्रतिषापयेदितिस्मृतिवचनेनाग्न्यंतराभावेहोममोत्रौद्देशेन लौकिकाग्निविधानान्मेवततो

देशोस्थापयित्वा तेष्विष्टिः कार्या । यत्तु तस्मिन्नग्निः स्थापनीतिगौतमवचनं तल्लौकिकाग्निप्रापकत्वेन
तत्रत्वेऽन्यस्यहतंतत्रैतमस्य तोतद्धेनस्मार्तानेरेवपरामर्शान्निषादेष्टेश्चाग्निहोत्राभावादुपे
क्षितः नहिगृहस्थान्नकारद्वयस्पर्शोहितमितिव्युत्पत्त्या स्यात् अपि गृह्यपरवाच्यत्वं अभिप्रुक्तप्र
सिध्या गृह्यपरस्य गृह्यस्तत्रैकृ कनेस्वेवरुढत्वेनयोगस्याप्रयोजकत्वात् इतरथा पार्श्वादेर
पिगृह्यत्वापत्तेः ॥ ॥ अवकीर्णि ॥ ॥ योब्रह्मचार्यवकिरेत्सनैर्ऋतं गर्दभं पशुमालभेतेति
श्रुतोपागोपिलौकिकएवाग्नौ सत्स्वपि गर्दभे बाणिकत्वे विद्वत्त्वे वाभापीभावेनाधानासंभवात् ॥
श्रुतोपागोपि नापि स्नात्वा विवाहे बाधकाभावः ॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदि
नचावकीर्णिनो कृतप्रायश्चित्तस्य विवाहनिषेधात् ॥ नब्रह्मचा
तिवचनेन विप्लुतब्रह्मचर्यस्यावकीर्णिनो कृतव्रतचर्यास्त्रमोक्तेराश्रयर्यां पौर्वापर्यमात्रस्यानेनविधा
विप्लुतब्रह्मचर्यपदेन कृतव्रतचर्यास्त्रमोक्तेराश्रयर्याः पौर्वापर्यमात्रस्यानेन विधा
नारत्वकीर्णिनोपि विहिताबाधकाभावः स्नात्वाभार्यामुपेयादित्यनेनैवस्नानपूर्वभार्यादिनोब्रह्मचर्य

भा.ध.
७६

स्यस्तानोत्तरमाविनाविवाहेनार्थ्यातोवीपयेमिद्धेरस्यवचनस्यसांगब्रह्मचर्यव्रतस्यनिवृत्त्याधिकारइ
त्येवमपेतयावविशीर्णोविवाहानुपयते॥ अतःहोमिफ्लौकिकाग्नावेव आपस्तंबवचनादस्पष्टत्वा॥
अयंचावकीर्णियागोनैर्ऋतपशुकःतिकः॥ गर्दभपशुरपितिपशुमल्लोपादानवैष्णव्यर्थात॥
उक्तायन्॥ किंतुअथपशुकल्पइत्याश्वलायनोक्तोयाःस्यात्तेपाश्विनिकर्त्तव्यतायारतेद
गत्वामितिकेचित्॥ ॥इहगापनः॥ अतोस्मतोवायस्मिन्कर्मणिहेवपित्र्येवोद्दापन
श्रुतौकचापश्चाद्यैःकालःप्रसक्तवचनोनाम्यार्थदर्शनकल्पविधिनावाविहितः
होविरोधेसमुच्चयेनविरोधेविकल्पेनग्नाह्यइत्येवंसूत्रहेतुमत्वात्तत्रकारःस्त्रीष्वे
ष्यपुंपुरिष्वाना॥॥पात्वाक्रयणं॥ ॥हीक्षितोमतिवन्वोहेतिपोचायस्यापिहाक्षिणा
दानार्थंद्रव्यमस्तितेनापिकार्या॥ नत्वविद्यमानद्रव्येपीव॥ नित्यवत्श्रवणेनसर्वद
वकत्तुनाश्वयेवैणचप्रयुक्तत्वात्॥ नचासाद्रव्यप्राप्तिद्वाराद्रव्यसंस्कारत्वाद्रव्यसत्वेचत

राम
७६

स्यापणोपापवैष्णव्यो॥ दृष्टस्यापिनिमित्तत्वश्रवणप्रयोजकत्वशास्त्रैवाकांक्षितविधिन्यायेनपत
निपमधिविधित्वोपपत्तिरितिवाच्यं अनाकांक्षितविधानस्यफलकल्पकत्वेन दोषत्वात्अकेत्वाविद्य
घमानद्रव्यस्थलेद्रव्यप्राप्तिरूपफलवद्विद्यमानद्रव्यस्थलेपितत्फलत्वाविशेषात्कत
कल्पनाभावेतदोषत्वाभावाद्याचप्राप्तद्रव्यस्यवक्रेलपूर्वग्रहणानित्यत्वोपपत्तेः। स
र्वविद्यमानेपिसोमेकपुस्याप्यावश्यकत्वं॥ ॥तथा नस्त सर्वंपयोव्रताद्यपिविद्यमाने
अविद्यमानेपिभस्यात्तरेस्यात्॥ अग्निहविन्वीहरेतिचप्रैषोन्यतोनवद्धेद्रुबुद्धेपिस्या
त्॥ बुद्धेप्यर्थेरेतदोषेअन्यनियमाद्दृष्टसिध्यर्थंवैषावश्यकत्वात्॥ अतरे वप्रैष
अन्यवोघानुचितेनैवफलसिद्धिरितिकल्पेनमपिप्रामाणिकं॥ प्रैषगनहगांचमंत्रमा
त्रोपलक्षणं॥ तथा इर्मम यं वास्वेवाअपपेवासोतरसत्वेपिपरिधेयमेव॥ तयायत्पशु
मायुमकतोरावायम्निराहतेअग्निमातस्मादेनसोविश्वान्मुंचत्वंहसइति मंत्रेणाविहितस्य

भाष· ७७ संज्ञप्तहोमस्यापि पशुयागे नित्यसंकरणं न च संज्ञप्तहोमस्य मात्रवर्णिकत्वाच्छ्रकरणादिजन्यदो
षनिर्घातफलप्रतीतेस्तदनुरोधेन मा पुष्प इत्याद्यवाच्छाद्यकरणाद्यवेव होम इति वाच्यं॥
शाखादिकरणस्य दोषजनकत्वे प्रमाणाभावेन मात्रवर्णिकफलकल्पनानुपपत्तेः॥ स
तदृष्टत्वेनैव दोषकल्पने गौरवाच्च। किंच नात्र शाखादिकरणदोषापि तु तदनुकूलयत्नरत्वा
रूपास्वरूपव्यापारत्वात्॥ तस्य च प्रतिबंधकत्वेनाशब्दाद्यनुत्पत्तावपि उत्पत्ताव्यापकत्वेन संज्ञ
प्तहोमस्य नित्यत्वं। शाख्या योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति मंत्रोऽपि द्वेष्यनिर्देशपरत्वेऽ
सत्त्वेवासर्वदैवप्रयोक्तव्यः॥ न च मंत्रलिंगवशेन प्रकरणसंकोचः परकृते द्वेष्यस्या
योग्यत्वेन तदभावनिश्चयप्रयोगात् स्वनिष्ठद्वेषविषयस्य तातपादादेरपि सम्भ
वे न मंत्रलिंगविरोधात्॥ ॥ अनर्थकं॥ ॥ यथोवृतंपदितो गोसल्यादिनाम रूपादिहेतु राम ७७
संभाव्यते तत्राक्तु विरोधप्रसंगान कार्यमेव॥ ॥ जाते विप्यायेनागतार्थमयी हित्रिप्याहि

नार्थमुक्तं॥ ॥ पशुचोदनायां॥ ॥ अग्नीषोमीयं पशुमालभेतेत्यादौ पशुशब्देन
सामान्यवचनः॥ नहि पशुत्वं जातिः प्रमाणाभावात्॥ कापेतायाः॥ कारणताया
पावानवच्छेदकत्वात्॥ नापि पुच्छादिमत्त्वं तस्यानुगतत्वाभावेन सामान्यत्वा
भावात्॥ ॥ अतः पशुशब्दो व्यक्तिवाची तत एव सर्वासामश्वादिव्यक्तीनामुप
क्तत्वान्नायं संदिग्धः॥ अतश्छागो वा मेष एव इत्यत्र छागस्य वपाया इति मंत्रस्य निया
मकत्वं॥ यद्यपि चायं सामान्यवाची भवेत्तथापि मंत्रस्याभिन्नेवाकत्वात्प्रत्यति
रेकेणा वविधेः सर्वपिषयतया पर्यवसानान्न तत्संकोचकत्वेः एवं सत्यपि य
हि मंत्रस्य विधायकता भवेत्तदा आर्षेयं वृणीते त्रीन्प्रवृणीत इति वदेवपि
विशेषणाविशेष्यभावो न त्वेतदस्ति अतो मंत्रस्य छागपदं छिन्नं स्वास्य
गमनवलयोगेन वयोविशेषवचनत्वेन वा सर्वपशुपर्यायछागपदं वा अत्रापंमे

भा.दी.
७८

त्र इति श्राप्रेष्य छगशब्दस्याजे रूढत्वेन यौगिकत्वानुपपत्तेः पुरस्तु तो विहितत्वेन
यौगिकार्थग्रहणानुपपत्तेश्च न तावद्यौगिकत्वं ॥ वपावत्स्वाविशेषवचन
त्वेपि च शौणादिशब्दवदजागतस्यैव वपसो वाच्यत्वात् स्वादिग्रहणानुपप
त्तेः छागग्रहणेनापि पशुत्वस्याविरोधोपपत्तौ मंत्रस्य याक्षिकत्वे कल्पना
नुपपत्तेः छागस्यैव ग्रहणं · यद्यपि च पशुःशब्दो व्यक्तिवचनः स्यात्तथापि यु
गपत्सर्वव्यक्तिग्रहणाभावेनैकव्यक्तिग्रहणे मंत्रस्य निरवकाशत्वात् छागव्य
क्तिमात्रग्रहणेपि न किंचिद्बाधकं वस्तुतस्तु सामान्यवाच्यपायं · तदपि यद्यपि पु
छवत्वादि तथापि पुंस्त्वावच्छिन्नवत्वास्यैवानुगतस्य वक्तुं शक्यत्वान्न विशेष
॥ वस्तुतस्तु पुछापपत्तौ तावपि पशुत्वप्रतीतेः पशुत्वं जातिरेवेति सामान्य
वचनत्वमव्याहतं तेन पुक्तैव मंत्रेण निर्णयः ॥ भिन्नत्वाकपत्वेपि च पशुछाग राम ७८

भा.दी.
७९

शब्दयोर्विशेषणविशेष्यभावो वाकैक वाक्यतया न विरुध्यते · इदं च सर्वं अजोग्नी
षोमीय इति श्रारवांतरवाकं नास्तीति कत्वाचिंन्न पावो ध्यं ततस्ति हं छागवत एवा
धिकार इति निरूपितोधिकारः ॥ ॥ इति श्रीखंडदेवकृतो भाट्टदीपिकायां षष्ठस्या
ष्टमः पादः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

राम
७९